सामगानां सन्ध्याप्रयोगः।

शिवपूजादिविधिश्च।

श्रीजलेश्वर शर्म्मणा

प्रकाशितः।

श्रीजगन्मोहन तर्क्कालङ्कार

परिशोधितः।

कलिकाता माणिकतला ष्ट्रीट् ७९ सङ्ख्य भवने

पुराणप्रकाश यन्त्रे

श्रीगोपालचन्द्र दे कर्तृक

मुद्रितः।

शकाब्दाः १७९४।

INDIA OFFICE LIBRARY

अथ सामगानां सन्ध्याप्रयोगः।

तत्रादौ आचमनम्।

ॐ विष्णुः ॐ विष्णुः ॐ विष्णुः तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततम्। १।

इत्याचम्य कालातिपाते गायत्रीं दशधा जप्त्वा मार्जनं कुर्य्यात्।

ॐ शन्न आपो धन्वन्याः शमनः सन्तु नूप्याः। शन्नः समुद्रिया आपः शमनः सन्तु कूप्याः। २।

धन्वन्या आपः मरुदेशभवानि जलानि शं कल्याणं नोऽस्माकं कुर्व्वन्त्विति शेषः। तथा नूप्याः अनूपदेशभवा आपः शमनः सन्तु शं कल्याणमनन्तीति क्विप्। शमनः कल्याणप्रापिकाः सन्तु। तथा समुद्रियाः समुद्रभवा आपः नोऽस्माकं शं कुर्व्वन्तु। तथा

मरुदेशका उत्पन्न जो जल है, सो हम लोगोंका मङ्गल करे। और अनूप देशका उत्पन्न जो जल है, वो हम लोगोंका कल्याणदाता होवे, समुद्रका जल हम लोगोंका मङ्गल करे, कुएसे उत्पन्न जो जल है, वो हम लोगोंका कल्याण देनेवाला होय ॥२॥

ओँ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः । ३ ।

ओँ आपो हि ष्ठा मयोभुव स्ता न उर्ज्जे दधातन महे रणाय चक्षसे । ओँ यो वः शिवतमो रसस्तस्य भाजयतेह न उशतीरिव मातरः । ओँ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः । ४ ।

कूप्याः कूपभवा आपः शमनः सन्तु । धन्वन्याः नूप्याः कूप्या इति भावश्छन्दसीति यत् । न्यूप्या इत्यकारलोपश्छान्दसः । समुद्रिया इति समुद्रादियः । २ ।

ओँ द्रुपदादिवेति । आपः मा माम् एनसः पापात् शुन्धन्तु पावयन्तु । शुन्ध शुद्धौ । अत्र दृष्टान्तमाह, द्रुपदादिव मुमुचानः स्विन्नः इति । यथा द्रुपदात् वृक्षमूलात् स्विन्नो घर्म्माक्तो जनो मुमुचानो मुक्तो भवति । यथा स्नातः कृतस्नानो मलाद्यादेर्मुक्तो भवति, यथा आज्यं घृतं पवित्रेणाज्यसंस्कारविधिना पूतं भवति, तथा आपो मामपि पावयन्त इत्याशंसावाक्यार्थः । मुमुचान इति मुच् ऌ मोक्षणे लिटः कानः । ३ ।

थका हुवा मनुष्य जैसे वृक्षके नीचे जाके ठण्ढा होता है, स्नान करे हुए लोग जिस प्रकार मलको दूर करते हैं, घृत जैसे मन्त्रद्वारा शुद्ध होए है, वैसेही जल मुझको पापसे शुद्ध करे ।३।

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रोऽर्णवः समुद्रादर्ण-वादधि संवत्सरोऽजायत। अहोरात्राणि विद-

आपो हीत्यादि मन्त्रत्रयं परत्र व्याख्यास्यते। ४।

ॐ ऋतञ्चेति, ऋतञ्च सत्यञ्चेति परं ब्रह्म उच्यते। तथाच श्रुतिः। ऋतमेकाक्षरं ब्रह्मेति। सत्यं ज्ञानमानन्दं ब्रह्मेति। आसीदित्यध्याहार्य्यम्। तेनायमर्थः, ऋतञ्च सत्यञ्च परब्रह्ममात्रमासीत्। एतेन महाप्रलयावस्था प्रतिपादिता। महाप्रलयसमये तु केवलं ब्रह्मैवासीत्यर्थः। ततो महाप्रलया-वस्थायामेव रात्र्यजायत रात्रिः समुत्पन्ना। सकलमन्धकार-मयमासीदित्यर्थः। तथा च स्मृतिः। आसीदिदं तमोभूतम-प्रज्ञातमिति। ततो महाप्रलयावसाने सृष्ट्यारम्भसमये तपसो-ऽदृष्टबलात् समुद्रोऽजायत। कीदृशः अर्णवः अर्णः पानीयं तदस्यास्तीत्यर्णवः पानीययुक्तः। प्रथमतः सकलसंसारसृष्टि-निमित्तं जलराशिरुत्पन्न इत्यर्थः। तथाच स्मृतिः। अप एव ससर्ज्जादौ तासु वीजमिति। कीदृशात्तपसः, अभीद्धात् अभि

ये तीन मन्त्रकी भाषा फेर मार्जन स्थानमे लिखी जायगी॥ ४॥

महाप्रलयके समैसे एकमात्र ब्रह्म थे, उस कालके केवल अन्धेरा ऊयाथा। फेर सृष्टिके आरम्भमे अदृष्टबलसे सृष्टिका मूल जलसे परिपूर्ण समुद्र उत्पन्न ऊवा, उसी जलसे विश्व प्रगट करनेवाले विधाता जन्मे। उन्होने दिन प्रकाशक सूर्य्य और

यद्विश्वस्य मिषतो वशी सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयद्दिवञ्च पृथिवीञ्चान्तरीक्षमथो स्वः ॥ ५ ॥

इति मार्जनम्।

सर्व्वतोभावेन दृद्धात् लब्धवृत्तेः। प्रलयसमये हि निरुद्धवृत्त्यदृष्टं भवति। ततोऽनन्तरं समुद्रादर्णवात् धाता स्रष्टा अध्यजायत। किम्भूतो धाता, मिषतः प्रकटीभवतो विश्वस्य वशी प्रभुः। महाप्रलये विलुप्तस्य त्रैलोक्यस्य निर्म्माणे प्रभुरित्यर्थः। स धाता यथापूर्वं यथाक्रमं सूर्य्याचन्द्रमसौ अकल्पयत् कल्पितवान्। किम्भूतौ? अहोरात्राणि विदधत् अहो रात्रिञ्च कुर्व्वाणौ। सूर्य्य एव दिवसं चन्द्र एव रात्रिं करोतीत्यर्थः। ततः सूर्य्याचन्द्रमसोरुत्पत्त्यनन्तरं संवत्सरोऽजायत समुत्पन्नः। सूर्य्यचन्द्रोत्पत्तौ दिनरात्रिविभागकल्पनया संवत्सरव्यवस्था भवतीत्यर्थः। अथो अनन्तरं दिवञ्च पृथिवीञ्चान्तरीक्षञ्च स्वश्च एताः स एव धाता अकल्पयत् चराचरात्मकसकललोकान् स एव धाता सृष्टवानित्यर्थः। आनन्तर्य्ये अथोशब्दस्त्वाव्ययः। स्वः शब्देन नक्षत्रलोकोपरि स्वर्लोक उच्यते। दिवशब्देन ऊर्द्ध्वस्थमहर्लोकादिचतुष्टयम्। तदित्थं मन्त्रेण सृष्टिस्थितिप्रलयाः प्रतिपादिताः।

रात्रके प्रकाशक चन्द्रमाको सृजन करके वरस वनाया अर्थात् जभीसे दिन, रात, ऋतु अयन वर्ष प्रभृति होने लगा, इसके वाद महः प्रभृति ऊपरके चारों लोक और भूः आदि लोक तीनो सृष्टि रचना करी थी ॥५॥

अथ प्राणायामः । तत्र बद्धाञ्जलिः ।

ॐकारस्य ब्रह्म ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता सर्व्वकर्म्मारम्भे विनियोगः । सप्तव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुबृहतीपङ्क्तित्रिष्टुप-जगत्यश्छन्दांसि अग्निवायुसूर्य्यवरुणबृहस्पतीन्द्र-विश्वेदेवा देवताः प्राणायामे विनियोगः । गायत्र्याः विश्वामित्रऋषिर्गायत्रीच्छन्दः सविता

रात्री इति रात्रेश्चाजसाविति ङीप् । विदधदिति हित्वे एकत्वम् । अर्णव इति अर्णस्-शब्दात् वः अन्यसलोपश्चेति व प्रत्ययः सकारलोपश्च ॥ ५ ॥

अथ मन्त्रार्थज्ञाने यतितव्यम् । अथ योऽहरहरविदितर्षि-च्छन्दोदैवतनियोगेन ब्राह्मणेन वा मन्त्रेण वा यजति याजयति वा अधीते अध्यापयति वा होमे कर्म्मणि अन्तर्जलादौ वा स पापीयान् भवति यातयामान्यस्य च्छन्दांसि भवन्ति अथ यो मन्त्रे मन्त्रे वेद सर्व्वं सः श्रेयान् भवति अयातयामान्यस्य च्छन्दांसि भवन्ति तस्मादेतानि मन्त्रे मन्त्रे विद्यात् इति श्रुतिः । तथाच व्यासः । प्रणवस्य ऋषिर्ब्रह्मा गायत्रीच्छन्द एव च । देवो ह्यग्नि-र्व्याहृतिषु विनियोगः प्रकीर्त्तितः । स्वदेहमरणिं कृत्वा प्रणव-

[अब ये सब मन्त्र किस ऋषिका बनाया है, और किस छन्दमे रचित है, और वो सबका अधिष्ठात्री देवता कौन है, और कौन से कामसे उनका प्रयोजन है ? ये सब जानना आवश्यक है,

देवता प्राणायामे विनियोगः । गायत्रीशिरसः प्रजापतिर्ऋषिर्गायत्रीच्छन्दो ब्रह्मवाय्वग्निसूर्य्या-स्त्रतस्रो देवताः प्राणायामे विनियोगः । ६ ।

इत्युक्त्वा जलं वेष्टयित्वा अङ्गुष्ठेन दक्षिणनासापुटं धृत्वा वामनासापुटेन वायुं पूरयन् प्रथमम्,

रक्तवर्णं चतुर्मुखं द्विभुजं अक्षसूत्रकमण्डलुकरं हंसासनारूढं ब्रह्माणं नाभिदेशे

ध्यायन् ।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः

स्त्रोत्तरारणिम् । ध्याननिर्म्मथनाद्विष्णुं पश्येदग्निं निगूढ़वदिति । तथा । आदौ ऋषिश्च च्छन्दश्च देवताविनियोगकः । गायत्रीं शिरसा सार्द्धं सप्तव्याहृतिपूर्व्विकाम् । प्राणायामे त्रिरावर्त्तं क्रमेण श्रावयेत्तथा । गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च । त्रिष्टुप्च जगती चेति च्छन्दांस्याहुरनुक्रमात् । अग्निवाय्वर्कवरुण बृहस्पतिपुरन्दरौ । विश्वेदेवा व्याहृतीनां दैवतानि तथाक्रमम् । विनियोगः स्मृतस्त्वासां प्राणायामे महर्षिभिरिति । बृहस्पति-र्विष्णुधर्म्मोत्तरश्च । आदानं रोधमुत्सर्गं मनसा त्रिः समभ्यसेत् ।

इससे मन्त्र पाठके पहले वो सब प्रकाशित होता है । प्रणव-का ऋषि ब्रह्मा, गायत्रीच्छन्द, देवता अग्नि, सब कामके आरम्भ-से प्रयोजन । सप्त व्याहृतिके ऋषि प्रजापति, च्छन्द गायत्री,

ॐ तपः ॐ सत्यं ॐ तत्सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ आपोज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्।

ततः अनामिकामध्यमाभ्यां वामनासापुटं धृत्वा वायुं संस्तम्भयन्,

हृदि नीलोत्पलदलप्रभं चतुर्भुजं शङ्खचक्रगदापद्महस्तं गरुड़ासनसमारूढ़ं केशवं

ध्यायन्।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्व्वरेण्यं भर्गो देवस्य

ब्रह्माणं केशवं शम्भुं ध्यायन् मुच्येत बन्धनात्। रक्तं पितामहं ध्यायेद्विष्णुं नीलोत्पलप्रभम्। श्वेतं त्र्यम्बकञ्चैव संसारार्णवतारकम्॥ योगियाज्ञवल्क्यः। वाह्यस्थितं नासपुटेन वायुमाकृष्य तेनैव शनैः समस्तम्। नाड़ीश्च सर्व्वाः परिपूरयेयुः स पूरको नाम महानिरोधः॥ न रेचको नैव च पूरको वा नासाग्रचारी स्थित एव वायुः। सुनिश्चलं ध्यायति यः क्रमेण कुम्भाख्यमेतत् प्रवदन्ति तज्ज्ञाः॥ निष्क्रम्य नासाविवरादशेषं प्राणं वहिः शून्यमिवानिलेन। निरुच्छ्वसंस्तिष्ठति चोर्द्ध्वबाहुः स रेचको नाम महानिरोधः॥ आकृष्य नासया श्वासं ध्यानं पूरक उच्यते। कुम्भो निश्चलनिश्वासो रिच्यमानस्तु रेचकः॥ प्राणेनाप्यायमानेन वेगं

उष्णिक, अनुष्टुप्, वृहती, पङ्क्ति, त्रिष्टुप् और जगती। देवता अग्नि, वाय, सूर्य्य, वरुण, वृहस्पति, इन्द्र और विश्वदेव, प्राणा-

धीमहि धियो यो नः प्रचोदयात्। ॐ आपो-
ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्।

ततो वृद्धाङ्गुष्ठमुत्तोल्य दक्षिणनासापुटेन वायुं त्यजन्।

ललाटे श्वेतं त्रिशूलडमरुकरम् अर्द्धचन्द्रवि-
भूषितं त्रिनेत्रं वृषभासनस्थं शम्भुं
ध्यायन्।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ
तपः ॐ सत्यम् ॐ तत्सवितुर्व्वरेण्यं भर्गो देवस्य

वाह्यं समुत्सृजेत्। येन शक्तून् करस्थांश्च निश्वासैर्न च चालयेत्॥ शनैर्नासापुटे वायमुत्सृजेन्न तु वेगवत्॥ अथ काम्यप्राणायामाः, दह्यमानोऽनुतापेन कृत्वा पापानि मानवः। मोच्यमानस्त्वहोरात्रं प्राणायामैः प्रपूयते॥ बौधायनः, विधिना शास्त्रदृष्टेन प्राणायामान् समाचरेत्। यदुपस्थकृतं पापं पद्भ्यां वा यत् कृतं भवेत्। बाहुभ्यां मनसा वाचा श्रोत्रत्वग्घ्राणचक्षुषा॥ विष्णुधर्म्मोत्तरे। सव्याहृतिः सप्रणवा जप्तव्या शिरसा सह। प्रणवेन तथा व्यस्ता वाच्या व्याहृतयः पृथक्। दशकृत्वः प्रजप्ता च रात्र्यह्ना यत् कृतं लघु। तत् पापं प्रशमं याति नात्र कार्य्या विचारणा। शतजप्ता च सा देवी पापोपशमनी स्मृता। सहस्रजप्ता तु तथा उपपातक-

---

यामसे प्रयोजन। गायत्रीके ऋषि विश्वामित्र, छन्द गायत्री, देवता सूर्य्य, प्राणायाममे प्रयोजन। गायत्री शिरके ऋषि

धीमहि धियो यो नः प्रचोदयात् ॐ आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् । ७ ।

इति प्राणायामः ।

तत आचमनं, तत्र प्रातर्मन्त्रः ।

सूर्य्यश्च मेति मन्त्रस्य ब्रह्म ऋषिः प्रकृतिश्छन्द

नाशिनी । लक्षजप्येन च तथा महापातकनाशिनी । कोटिजप्येन राजेन्द्र यदिच्छति तदाप्नुयात् । यक्षविद्याधरत्वं वा गन्धर्व्वत्वमथापि वा ॥ इति प्राणायामाः । ६ । ७ ।

अथ प्राणायामानन्तरमाचमनमाह बौधायनः । सर्य्यश्च मा मन्युश्चेति । प्रातः पवित्रपाणिराचामेदिति । अस्यार्थः । मा मां

प्रजापति, छन्द गायत्री, देवता ब्रह्मा, वायु, अग्नि और सूर्य्य, प्राणायाम करने मे प्रयोजन ॥६॥

[जल द्वारा शरीरको वेष्टनके बाद दहने अङ्गुठसे दहेनी नासिकाको दबा करके बाइ नासिका द्वारा श्वास आकर्षण करते करते, रक्तवर्ण चारमुख अक्षसूत्र कमण्डलुधारी दो हाथ हंस पर चढ़े हुये हमारे नाभिदेशमे हैं, [इसी प्रकार भावना करके] सूर्य्यदेवका भूः आदि सप्त लोकव्यापि उत्कृष्ट ज्योति चिन्ता करता हूं, यही हम लोगोंकि बुद्धिको यथार्थ पथमे लेजाय है, तेज, रस और अमृतरूप ब्रह्म भूः भुवः स्वः, ये तीन लोकसे देदीप्यमान है । (इसके बाद अनामिका और मध्यमा अङ्गुली द्वारा बाइं नासिकाकोभी बन्ध करके कुम्भक करते

आपो देवता आचमने विनियोगः। ॐ सूर्य्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यद्रात्र्या पापमकार्षं मनसा वाचा हस्ता-

रक्षान्तां, के? सूर्य्यश्च मन्युश्च। मन्युर्यज्ञः। मन्युपतयश्च यज्ञपतय इन्द्राद्याः। केभ्यो रक्षन्तां, पापेभ्यः। किम्भूतेभ्यः मन्युकृतेभ्यः असाङ्गयज्ञभूतेभ्यः। यद्वा मन्युः क्रोधोऽत्र। पक्षे क्रोधपतय इन्द्रियाणि। क्रोधकृतेभ्यः पापेभ्यः क्रोधाच्च रक्षन्ताम्। किमुक्तं भवति, ममैतादृशः क्रोधो मा भवतु येनाहमकार्य्यं करोमीति। यत् किञ्चित् पापं रात्र्या अकार्षं कृतवानस्मि, केन केन? मनसा वाचा हस्ताभ्यां पद्भ्याम् उदरेण शिश्ना। तत् पापं अहर्दिवसोऽवलुम्पतु

करते) नीलोत्पलवर्ण शंख चक्र गदा पद्मधारि चार भुजा गरुड़ पर चढ़े हुए विष्णु हमारे हृदयमे हैं, [इसी प्रकार ध्यान करके] पूर्व मन्त्र पाठ करना, [इसके बाद अङ्गुष्ठकी दहनी नाकसे उठाके उसी नाकसे वायु छोड़ते छोड़ते] शुक्लवर्ण त्रिशूल डमरुधारि अर्धचन्द्र शोभित तीन नेत्र बैल पर चढ़े हुये हमारे ललाटसे हैं [ऐसा ध्यान करके] पूर्व मन्त्र पाठ करना ॥७॥

प्रातराचमनमन्त्रका ऋषि ब्रह्मा, छन्दः प्रकृति, देवता जल, आचमनमे प्रयोजन। सूर्य यज्ञ और इन्द्रादि देवता सब, हमको असाङ्ग यज्ञ निबन्धन पापसे रक्षा करें। हमने रात-की मन वचन हाथ पांवो जठर और शिश्न द्वारा जो पाप

भ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत्
किञ्चिद्दुरितं मयि इदमहमापोऽमृतयोनौ सूर्य्ये
ज्योतिषि परमात्मनि जुहोमि स्वाहा ॥ ८ ॥

मध्याह्ने मन्त्रस्य ।

आपः पुनन्त्विति मन्त्रस्य विष्णुर्ऋषिः प्रकृति-श्छन्द आपो देवता आचमने विनियोगः । ॐ

नाशयतु । यत् किञ्चिन्मयि मदाश्रितं पापं तदिदमापः अहं सूर्य्ये जुहोमि । किम्भूते ? ज्योतिषि, हृत्पद्ममध्यस्थितप्रकाशरूपे ज्योतिषि स्वाहा सुहुतं भवत्विति । मन्युर्दैन्ये क्रतौ क्रुधीति कोषः । शिश्नेति शिश्नेनेत्यर्थः । प्राप्ते सर्वे विषयाश्छन्दसि विकल्पन्ते इतीनादेशो न भवति । आप इति सकारान्त आपः-शब्दोऽयमिति ॥ ८ ॥

सूर्य्यश्चेति मन्त्रव्याख्याप्रसङ्गान्मध्याह्नसायंसन्ध्ययोरपि मन्त्र-योर्व्याख्या उच्यते, आपः पुनन्त्वित्यादि । अस्यार्थः, आपः पृथिवीं पुनन्तु पवित्रां कुर्वन्तु । पृथिवी अद्भिः पूता सती

किया हैं, दिन उसको नाश करे । हमारे मे और जो कुछ पाप है वो ये जल रूप पापको हृत्पद्मस्थित स्वप्रकाश स्वरूप सूर्य्यज्योतिसे मैं होम कर्त्ता हूं । ये सिद्ध होय ॥८॥

मध्याह्न आचमनके ऋषि विष्णु, छन्द प्रकृति, देवता जल, आचमनमे प्रयोजन । जल हमारे पार्थिव शरीर और ज्ञाना-श्रय परमात्माको पवित्र करे । देह पवित्र होके आत्माको

आपः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु मां पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां यदुच्छिष्टमभोज्यञ्च यद्वा दुश्चरितं मम सर्व्वं पुनन्तु मामापोऽसताञ्च प्रतिग्रहं स्वाहा ॥ ८ ॥

चेतन्नं मां पुनातु। न केवलमापः पृथिवीं पुनन्तु अपि तु ब्रह्मणः पतिं ज्ञानस्य पतिं ज्ञानाश्रयं परमात्मानमपि पुनन्तु। तद्ब्रह्म पूता पूतं सत् मां पुनातु। अत्र पृथिवीपदेन पार्थिवो देहो विवक्षितः। ततश्चापः पृथिवीं पुनन्तु मदीयं पार्थिवं देहं पुनन्त्वित्यर्थः। इत्थं देहपावनद्वारा मां पुनन्तु। कुत्र, मम यदुच्छिष्टं न पवित्रम् अभोज्यं गर्हितं भोज्यं यद्वा यदपि दुश्चरितम् असदाचरणम् असतामप्रतिग्राह्याणां प्रतिग्रहञ्च तत् सर्वं तत्र सर्वत्र मामापः पुनन्त्वित्यर्थः। इत्यमाशास्य आप आचम्यन्ते। ताः स्वाहा सुहुतवत्यः, आप आचमनेन मदीयदेहपावनपूर्वकमुच्छिष्टादिरूपपापेभ्यो मां पावयन्त्वित्याशंसावाक्यार्थः। अत्र पतिरिति सुपां सुपो भवन्तीति द्वितीयार्थे प्रथमा। ब्रह्म पूता पूतमिति प्राप्तलिङ्गव्यत्ययेन स्त्रीलिङ्गता। सर्वमिति सप्तमीस्थाने द्वितीया ॥ ८ ॥

पवित्र करे। ब्रह्म पवित्र होके इसी प्रकार शरीर पावन द्वारा उच्छिष्ट, अभोज्य, असदाचरण और अग्राह्य-ग्रहण-जनित हमारे सब पापोंको मोचन करें। ये आचमन रूप होम सिद्ध होय। ८।

सायाह्ने मन्त्रश्च।

अग्निश्च मेति मन्त्रस्य रुद्र ऋषिः प्रकृतिश्छन्द आपो देवता आचमने विनियोगः। ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्

सायंसन्ध्याचमनमन्त्रः। ॐ अग्निश्च मेत्यादि। अस्यार्थः, अग्न्यादयः पापेभ्यो मा मां रक्षन्तां, मन्युकृतेभ्यः असाङ्गयज्ञेभ्यः क्रोधजनितेभ्यो वा। यत् पापमहमह्ना दिवसेनाकर्षं कृतवानस्मि। केन केन, मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना तत् पापं रात्रिरवलुम्पतु नाशयतु, तथा मयि मदाश्रितं यत् किञ्चिद्दुरितं यावदेव पापं तदिदं जलरूपं ज्योतिषि परमात्मनि जुहोमि। कीदृशे सत्ये। तत् स्वाहा सुहुतं भवत्विति वाक्यार्थः।

सायाह्न आचमन मन्त्रके ऋषि रुद्र, छन्दः प्रकृति, देवता जल, आचमनमे प्रयोजन। अग्नि यज्ञ और इन्द्रादि देवता सब, हमको असाङ्गयज्ञ निबन्धन पापसे रक्षा करें। मैंने दिनको मन, वाक्य, हाथ, पाओ, जठर, और शिश्न द्वारा जो पाप किया है रात उस्को नाश करे। मेरेमे जो कुछ पाप है ये जल रूप वोहि पाप, सत्य और ज्योतिःस्वरूप परमात्मामे होम करताहूं, इये सिद्ध होय॥१०॥

किञ्चिद्दुरितं मयि इदमहमापोऽमृतयोनौ सत्ये ज्योतिषि परमात्मनि जुहोमि स्वाहा ॥ १० ॥

इत्याचमनम् ।

(ततो जले गायत्रीं जप्त्वा पुनर्माज्जनं कुर्य्यात् ।)

आपो हि ष्ठेति ऋक्त्रयस्य सिन्धुद्वीप ऋषि-र्गायत्रीच्छन्द आपो देवता आपो मार्जने विनि-

सर्व्वमन्यत् पूर्व्ववत् । प्रातः सूर्य्यस्य दीप्यमानत्वात् सायम-ग्नेर्भासमानत्वाद्‌यथायोग्यं सूर्य्याग्नी प्रार्थ्येते ॥ १० ॥

आपोहिष्ठेति । अस्यार्थः । हे आपो हि यस्मात् यूयं मयोभुवः मयः सुखं तस्य भुवो भावयित्र्यः स्थ सुखदायिन्यो भवथ तस्मा-न्नोऽस्मानूर्ज्जे अन्नाय दधातन स्थापयत । किञ्च महे महते रणाय रमणीयाय चक्षसे दर्शनाय । दधातनेति पूर्व्वेणैव सम्बन्धः । अय-मर्थः, हे आपो यस्मात् यूयं सुखं प्रापयथ तस्मात् कारणात् अस्मा-नैहिकेनार्थेन आमुष्मिकेण महारमणीयदर्शनेन परब्रह्मणा संयोजयत इत्यप्सु प्रार्थना । अत्र ष्ठेति अस्तेर्लट्मध्यमपुरुषब-हुवचनं, पूर्व्वपदादिति षत्वम्, अन्येषामपि दृश्यत इति दीर्घः ।

पुनर्माजनके तीनो मन्त्रके ऋषि सिन्धुद्वीप, छन्द गायत्री, देवता जल, मार्जनमे प्रयोजन । हे जल ! तुम अति सुख देनेवाले हो, इससे हम लोगोंको इस लोकमे अन्न विधान करो, और परलोकमे हम लोगोंको महारमणीय परब्रह्मके

योगः । ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्ज्जे दधातन महे रणाय चक्षसे ॥ ॐ यो वः शिव-तमो रसस्तस्य भाजतेह न उशतीरिव मातरः । ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः ॥ ११ ।

इति पुनर्म्मार्ज्जनम् ।

ततो जलगण्डूषं नासिकायामारोप्य ।

ऋतञ्च सत्यञ्चेति मन्त्रस्य अघमर्षण ऋषिर-

दधातनेति लोट्मध्यमपुरुषबहुवचनस्थाने तनपादेशश्चेति तनपादेशः। ता इति तच्छब्दस्य सुपां सुलुगित्यादिसूत्रेण। तादेशः महत इत्यस्य पदस्य छान्दसत्वादकारतकारयोर्लोपे महे इति भवति। रमणीयायेत्यस्य मकारेयकाराकाराणां लोपे रणायेति भवति। चक्षस इति असन्ताच्चतुर्थी। ॐ यो व इत्यादि। हे आपो वो युष्माकं यो रसो निर्यासः परमार्थः। किम्भूतः, शिवतमोऽत्यन्तकल्याणस्वरूपः। तस्य रसस्य इह नोऽस्मान् भाजयत भागिनः कुरुत,

---

सहित संयोजित करना, हे जल! तुम सब हिताभिलाषिणी माताके न्याय इस लोकमे हम लोगोंको अतिकल्याणदाता अपने रसका भागी करना। हे जल! तुम जिस रससे जगत्परितृप्त करते हो, हम लोग उससे तृप्ति लाभ करें। ११।

नुष्टुप्छन्दो भाववृत्तो देवता अश्वमेधावभृथे विनियोगः । १२ ।

तेन रसेन सम्बद्धान् कुरुतेत्यर्थः । किम्भूता यूयम् ? उशतीः इच्छन्त्यो मातर इव । अयमर्थः, यथा सस्नेहा मातरः पुत्रान् कल्याणयुक्तान् कुर्व्वन्ति तथा यूयमपि कल्याणात्मकयुष्मदीयरससम्बद्धान् अस्मान् कुरुतेत्यस्तु प्रार्थना । भाजयतेति भाजेर्ण्यन्तात् प्रार्थने लोट् । उशतीरिति वशकान्तौ इत्यस्य प्रथमा बहुवचने रूपं छान्दसम् । ॐ तस्मा इत्यादि । हे आपः ! वो युष्माकं तस्मै तस्मिन् रसे अरम् अलं पर्य्याप्तिं गमाम गच्छामः । तत्र युष्मदीयरसविषये तृप्तिं गच्छाम इत्यर्थः । किञ्च तत्रैव रसविषये नोऽस्मान् यूयं जनयथ, तत्र सक्षीकृत्वेनाऽस्मान् परिकल्पयथेत्यर्थः । चकारः समुच्चये । आपो हि ष्ठावदत्रापि जनयथा इत्याकारः । तस्य कस्य ? यस्य रसस्य क्षयाय क्षये स्थाने जिन्वथ प्रीणयथ आब्रह्मस्तम्बपर्य्यन्तं जगदिति शेषः । तस्मै क्षयाय इत्य भयत्र सुपां सुपो भवन्तीति सप्तम्यर्थे चतुर्थी । जिन्वथेति जिवि प्रीणनार्थः । ततः लट-मध्यम-पुरुषबहुवचनान्तस्य रूपम् । अथवा हे आपः ! युष्माकं यस्य रसस्य कीदृशस्य क्षयस्य स्थानस्य आब्रह्मस्तम्बपर्य्यन्तजगदाधारभूतस्य, यूयं जिन्वथ प्रीणयथ तस्मै रसाय वयम् अरम् अलं शीघ्रं गमाम गच्छामः, ततो नोऽस्माकं यूयं जनयथ जनयथा तं रसं परिकल्पयथेत्यर्थः ॥ ११ ॥

ऋतञ्च सत्यञ्चेति मन्त्रके ऋषि अघमर्षण, छन्द अनुष्टुप्, देवता भाववृत, अश्वमेधस्नानमे प्रयोजन । १२ ।

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत ततो रात्र्यजायत ततः समुद्रोऽर्णवः समुद्रादर्णवादधि संवत्सरोऽजायत अहोरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयद्दिवञ्च पृथिवीञ्चान्तरीक्षमथो स्वः॥ १३।

इति पठित्वा भूमौ तज्जलगण्डूषं त्यजेत्। ततो गायत्र्या जलाञ्जलित्रयं सूर्य्याय दद्यात्। मध्याह्ने तु सकृत्। ततः सूर्य्यो पस्थानं कुर्य्यात्, तत्र मन्त्रः।

उदुत्यमित्यस्य प्रस्कन्न ऋषिर्गायत्रीच्छन्दः सूर्य्यो देवता सूर्य्योपस्थाने विनियोगः। ॐ उदुत्यं

ॐ ऋतञ्च सत्यञ्चेति उक्तार्थमेतत्॥ १३॥

अथ सूर्य्योपस्थानम्।

ॐ उदुत्यमित्यादि, अस्यार्थः। त्यं तं सूर्य्यं देवं केतवो रश्मय उद्वहन्ति। किम्भूतं जातवेदसं तेजोमयमित्यर्थः। किमर्थमुद्वहन्ति, दृशे दर्शनाय। कस्य विश्वाय विश्वस्य। अयं वाक्यार्थः, तेजःस्वरूपं सूर्य्यं देवं विश्वप्रकाशनाय रश्मय उद्वहन्तीति व्यवहितोपसर्गसम्बन्धः। उद्विति सम्बोधनार्थो वा विश्वायेति षष्ठीस्थाने

इस मन्त्रका अर्थ मार्ज्जनके स्थानसे लिखा गया है। १३।

सूर्य्योपस्थानके मन्त्रका ऋषि प्रस्कन्न, छन्द गायत्री,

जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम् ॥ १४।

चित्रमित्यस्य कौतस ऋषिस्त्रिष्टुप् छन्दः सूर्य्यो देवता सूर्य्योपस्थाने विनियोगः। ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरीक्षं सूर्य्य आत्मा जगतस्तस्थुषश्च ॥ १५ ॥

इति सूर्य्योपस्थानम्।

चतुर्थी। कीदृशः सूर्य्यस्तत्रोच्यते। ॐ चित्रं देवानामित्यादि। अस्यार्थः। असौ सूर्य्य उदगात् उदितोऽभवत्। कीदृशः? मित्रस्य वरुणस्याग्नेस्त्रयाणां देवानां चक्षुः। पुनःकिम्भूतः? देवानामनीकं मित्रादिदेवातिरिक्तानां देवानां समूहस्वरूपः। कथमुदगात् चित्रमाश्चर्य्यं यथा भवति। उदिता च द्यावापृथिवी-श्चान्तरीक्षं स्वर्गमर्त्त्याकाशमाप्रा आपूरितवान् स्वेन रश्मि-जालेनेति शेषः। कीदृशः? जगतो जङ्गमस्य तस्थुषः स्थावरस्य पर्व्वतादेरात्मा स्थावरजङ्गमात्मसकलसंसारमयोऽयमेव सूर्य्य इत्यर्थः। आप्रा इति आङ्पूर्व्वस्य प्रा पूरणे इत्यस्य लङः प्रथम

देवता सूर्य्य, सूर्य्योपस्थानमे प्रयोजन। विश्व प्रकाशके निमित्त, किरण सब तेजोमय सूर्य्य देवको उद्वहन करते हैं। १४।

दूसरे मन्त्रके ऋषि कौत्स, छन्द त्रिष्टुप्, देवता सूर्य्य, सूर्य्य उपस्थानमे प्रयोजन। मित्र, वरुण, और अग्नि ये तीनो देवता-

ॐ ब्रह्मणे नमः ॐ ब्राह्मणेभ्यो नमः ॐ आचार्य्येभ्यो नमः ॐ ऋषिभ्यो नमः ॐ देवेभ्यो नमः ॐ वेदेभ्यो नमः ॐ मृत्यवे नमः ॐ वायवे नमः ॐविष्णवे नमः ॐनमो वैश्रवणाय चोपजाय च।

इति प्रत्येकं जलाञ्जलिना प्रत्युपस्थानं कुर्य्यात्। एतदनन्तरं निष्पितृकस्य पित्रादितर्पणम् ॥ १६ ॥

अथ गायत्र्या आवाहनम्। तत्र कृताञ्जलिः।

ॐ आयाहि वरदे देवि त्र्यक्षरे ब्रह्मवादिनि।

इत्यावाह्य।

पुरुषैकवचनस्थाने तिङां तिङो भवन्तीति मध्यमपुरुषैकवचनम्। एतौ च मन्त्रौ सूर्य्योपस्थाने विनियुक्तौ सूर्य्यदैवतौ गायत्रीत्रिष्टुप्छन्दसौ प्रस्कन्नकौत्सदृष्टौ यथाक्रमम् ॥ १४ ॥ १५।

ॐ जातवेदस इति। त्रिष्टुबियमाग्नेयी काश्यपदृष्टा आत्म-

ओंके चक्षुस्वरूप और सब स्थावर जङ्गमके आत्मास्वरूप, सर्व देवमय सूर्य्य अतिआश्चर्य्य रूपसे उदित होके अपनी रश्मिजालसे स्वर्ग, मर्त्य, आकाशको परिपूर्ण किया है ॥ १५ ॥

ब्रह्मा, ब्राह्मण, आचार्य्य, ऋषि, देवता, वेद, मृत्यु वायु, विष्णु और वैश्रवण तथा उपजमे सब प्रत्येकको प्रणव आदि नमः अन्तमे नामोच्चारण पूर्वक एक एक अञ्जलि जलद्वारा तर्पण करना (पिता हीन मनुष्य इसी स्थलमे प्रात्यह्निक पित्रादिकों को तर्पण करें) ॥ १६ ॥

हे परमार्थप्रदे! वरदायिनि, वेदप्रकाशिनि, छन्दो-

गायत्रि च्छन्दसां मातर्ब्रह्मयोनि नमोऽस्तु ते ।१७।

ॐ (हृदि) ॐ भूः (शिरसि) ॐ भुवः (शिखायाम्) ॐ स्वः (सर्व्वगात्रेषु) ॐ तत् सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात ।

करतलद्वये

एवमपरवारद्वयं न्यसेत् ।

गायत्र्याः विश्वामित्र ऋषिर्गायत्रीच्छन्दः सविता देवता जपोपनयने विनियोगः ॥ १८ ॥

रक्षायां विनियुक्ता । वयं जातवेदसे अग्नये सोमं यज्ञविशेषं सुनवाम सन्दधीमहि । स जातवेदाः अरातीयतोऽहितान् निदहाति भस्मीकरोति तथा वेदः वेदं परिषदति वशीकरोति नोऽस्माकमित्यभयत्र योज्यम् । तथा विश्वा विश्वम् अग्निरग्निना दुर्गाणि दुरितानि अतिक्रामयति नावा सिन्धुमिव नौकया नदीमिव । सुनवामेति लोट उत्तमपुरुषबहुवचनम् । अरातीय इति अरातिशब्दादहितार्थे ईयः, ततः आद्यादित्वाद्द्वितीयान्तात्तसिः । निदहातीति च्छान्दसः । वेद इति द्वितीयार्थे प्रथमा । परिषद-

---

माता, व्यक्षररूपा, गायत्री देवी आगमन करें, मैं तुमको नमस्कार करताहूं ॥ १७ ॥

गायत्रीके ऋषि विश्वामित्र, छन्द गायत्री, देवता सूर्य्य, जपमे प्रयोजन ॥ १८ ॥

अथ गायत्रीध्यानम् ।

कुमारीमृग्वेदयुतां ब्रह्मरूपां विचिन्तयेत् ।
हंसस्थितां कुशहस्तां सूर्य्यमण्डलसंस्थिताम् ।
मध्याह्ने विष्णुरूपाञ्च तार्क्षस्थां पीतवाससीम् ।
युवतीञ्च यजुर्व्वेदां सर्य्यमण्डलसंस्थिताम् ।
सायाह्ने शिवरूपाञ्च वृद्धां वृषभवाहिनीम् ।
सूर्य्यमण्डल-मध्यस्थां सामवेदसमायुताम् ।

एवं प्रातरादिकालभेदेन यथाक्रमं गायत्रीं सावित्रीं सरस्वतीं ध्यायन् ऊर्द्ध स्तिष्ठन् प्रातरुर्द्धोत्तानकरौ मध्याह्ने तथा तिष्ठन् तिर्य्यक्करौ सायमुपविष्टोऽधोमुखौ करौ कृत्वा अनामिकामध्यमूलपर्व्वद्वय-कनिष्ठामूलादि-पर्वत्रय-अनामिकाग्रपर्व-मध्यमाग्रपर्व-तर्जन्यग्रादिपर्वत्रयरूप-दशपर्वसु अङ्गुष्ठाग्रपर्व-योगेन ।

ॐ भूर्भुवः स्वः तत् सवितुर्व्वरेण्यम् । भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ ।

इति दशधा जप्त्वा समर्थश्चेत शतधा सहस्रधा वापि ॥ १९ ॥

तीति सदेरप्रतेरिति षत्वम् । विश्वा इति सुपां सुलित्यादिना

(प्रातःकालमे गायत्रीको) कुमारी, ऋग्वेदस्वरूपा, ब्रह्म-रूपिणी, हंस पर चढ़ी ऊइ, कुशहस्ता सूर्य्यमण्डलमे हैं ।

ॐ महेशवदनोत्पन्ना विष्णोर्हृदयसम्भवा ।
ब्रह्मणा समनुज्ञाता गच्छ देवि यथेच्छया । २० ।

इत्यनेन विसर्जयेत् ।

अनेन जपेन भगवन्तावादित्यशुक्रौ प्रीयेताम् ।
ॐ आदित्यशुक्राभ्यां नमः ॥ २१ ॥

इति जलाञ्जलिं दद्यात् ।

अथ आत्मरक्षां कुर्यात् ।

जातवेदस इत्यस्य काश्यप ऋषिस्त्रिष्टुप्छन्दोऽग्निर्दैवता आत्मरक्षायां जपे विनियोगः । ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ २२ ॥

इति शिरसि रक्षां कुर्यात् ।

सिद्धम् दुरिताति दुःखेनेतो दुरितः दुरित इव आचरतीति आचारे क्विः, ततो लटः ति आकारश्छान्दसः । अग्निरिति तृतीयैकवचनस्य सुप् ॥ २२ ॥

(इसी प्रकार चिन्ता करके दश वार गायत्री जप करना । (गायत्रीका अर्थ प्राणायामके स्थानमे लिखा है) मध्याह्नमे गायत्रीको) युवती यजुर्वेदस्वरूपा विष्णुरूपिणी, गरुड़ारूढ़ा, पीतवस्त्रधारिणी, सूर्य्यमण्डलमे विराजमान, हैं । (इसी

ऋतमित्यस्य कालाग्निरुद्र ऋषिरनुष्टुप् छन्दो रुद्रो देवता रुद्रोपस्थाने विनियोगः।

ॐ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्द्ध्वलिङ्गं विरूपाक्षं विश्वरूपं नमो नमः॥२३॥

इति कृताञ्जलिर्जपेत्।

ॐ ऋतमित्यादि। परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ऊर्द्ध्वलिङ्गं विरूपाक्षं विश्वरूपं नमो नमः इति॥ अनुष्टुबियं कालाग्निरुद्रदृष्टा रुद्रदेवताका तदुपस्थाने विनियुक्ता। करोमीत्यध्याहार्य्यम्।२३।

इति सामवेदिसन्ध्याव्याख्या समाप्ता।

प्रकार ध्यान करके पूर्वरूप जप करना) (सायं कालमे गायत्रीको) वृद्धा, सामवेदस्वरूपा) शिवरूपिणी, बैल पर सवार, सूर्य्यमण्डलमे हैं। इसो प्रकार चिन्ता करके पहले कहे ऊए प्रकारसे जप करे। आत्मरचा मन्त्रके ऋषि काश्यप छन्द त्रिष्टुप, देवता अग्नि, आत्मरचामे प्रयोजन। जो अग्नि हम लोगोंके अहितकारियोंकी भस्म और वेदकी अधीन करे हैं, विश्वनौका द्वारा समुद्र तरनेके न्याइं, जिस अग्नि द्वारा दुर्गम दुरितसे उत्तीर्ण होय है, हम लोग उसी अग्निके निमित्त सोम यज्ञ अनुसन्धान करें॥२२॥

रुद्रोपस्थान मन्त्रके ऋषि कालाग्निरुद्र, छन्द अनुष्टुप, देवता, रुद्र, रुद्र उपस्थानमे प्रयोजन। ऊर्द्ध्वरेता, त्रिनेत्र, विश्वमय, नीललोहित पुरुषरूप नित्यसत्य परब्रह्मको मैं नमस्कार करता हूं॥२३॥

ॐ ब्रह्मणे नमः ॐ अद्भ्यो नमः ॐ वरुणाय नमः ॐ विष्णवे नमः ॐ रुद्राय नमः ॥ २४ ॥

इत्यनेन जलाञ्जलीन् दत्त्वा सूर्य्याय अर्घ्यं दद्यात्।

ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे।
जगत्सवित्रे शुचये सवित्रे कर्म्मदायिने।
इदमर्घ्यम् ॐ श्रीसूर्य्याय नमः ॥ २५ ॥

इति सूर्य्याय अर्घ्यं दत्त्वा।

ॐ जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्।
ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥२६

इति प्रणमेत्।

ब्रह्मा, अप, वरुण, विष्णु और रुद्र ये प्रत्येकको ॐकारादि नमोन्तनामोच्चारण पूर्वक एक एक अञ्जलि जल देना ॥२४

कर्म्मफलदायी, जगत्प्रकाशक, विष्णुतेजोरूप, ब्रह्मतेजोमय, दीप्तिमान् सूर्य्यको नमस्कार करके अर्घ्य दान करता हूं ॥२५

जवाफूल जैसा लाल वर्ण, अतितेजस्वी, तमोराशि-नाशी सर्वपापविनाशी, कश्यपके पुत्र दिवाकरको प्रणाम करता हूं ॥२६॥

यदक्षरं परिभ्रष्टं मात्राहीनञ्च यद्भवेत् ।
पूर्णं भवतु तत्सर्व्वं त्वत्प्रसादात् सुरेश्वरि ।२७।

इति जलगण्डूषं दद्यात् ।

इति सामगानां सन्ध्याप्रयोगः समाप्तः ।

सन्ध्या क्रियामे मेरा जो जो अक्षर और मात्रा अशुद्ध हुआ है, हे गायत्री देवि ! वो सब तुम्हारे अनुग्रहसे सम्पूर्ण होय ॥ २७ ॥

इति सामवेदिसन्ध्याका भाषा अर्थ समाप्त ।

प्रथममन्त्रका अर्थ ।

ॐकारके सहित तीन वार विष्णु स्मरण पूर्वक, देवता सब विष्णुके अन्तरीक्षमे विक्षिप्त चक्षुके न्याइं अप्रतिहतगति उसी परमपदको सर्वदा दरशन करते हैं ॥१।

शिवपूजाविधिः ।

जलशुद्धिः ।

अङ्कुशमुद्रया । ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।

आसनशुद्धिः ।

एते गन्धपुष्पे ॐ आधारशक्ति कमलासनाय नमः । इति आसने गन्धपुष्पदानानन्तरम् आसनं धृत्वा । आसनमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसनोपवेशने विनियोगः । ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम् । इति पाठानन्तरं वामे । ॐ गुरुभ्यो नमः । दक्षिणे । ॐ गणेशाय नमः । ऊर्द्धे । ॐ ब्रह्मणे नमः । अधः । ॐ अनन्ताय नमः । सम्मुखे । ॐ शिवाय नमः ।

शिवस्य स्नानम् ।

इदं स्नानीयजलं ॐ शिवाय नमः ।

शिवस्य ध्यानम् ।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् । पद्मा-

...मीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।

इति ध्यात्वा मानसोपचारैः संपूज्य पुनर्ध्यात्वा पाद्यादिभिः पूजयेत्।

पूजाक्रमः।

एतत् पाद्यं ॐ शिवाय नमः, इदमर्घ्यं ॐ शिवाय नमः, इदमाचमनीयजलं ॐ शिवाय नमः, एष गन्धः ॐ शिवाय नमः, एतत् सचन्दनपुष्पं ॐ शिवाय नमः, (एतत् सचन्दनतुलसीपत्रं ॐ शिवाय नमः,) एतत् सचन्दनबिल्वपत्रं ॐ शिवाय नमः, एष धूपः ॐ शिवाय नमः, एष दीपः ॐ शिवाय नमः, एतन्नैवेद्यं ॐ शिवाय नमः, इदं पानार्थजलं ॐ शिवाय नमः, इदमाचमनीयजलं ॐ शिवाय नमः, इदं पुनराचमनीयजलं ॐ शिवाय नमः, इदं ताम्बूलं ॐ शिवाय नमः।

पूर्व्वादिक्रमेण ईशानपर्य्यन्तम् अष्टमूर्तिपूजा।

एते गन्धपुष्पे ॐ सर्व्वाय क्षितिमूर्त्तये नमः, एते गन्धपुष्पे ॐ भवाय जलमूर्त्तये नमः, एते गन्धपुष्पे ॐ रुद्राय अग्निमूर्त्तये नमः, एते गन्धपुष्पे ॐ उग्राय वायुमूर्त्तये नमः, एते गन्धपुष्पे ॐ भीमाय आकाशमूर्त्तये नमः एते गन्धपुष्पे ॐ पशुपतये यजमानमूर्त्तये नमः, एते गन्धपुष्पे ॐ महादेवाय सोममूर्त्तये नमः, एते गन्धपुष्पे ॐ ईशानाय सूर्य्यमूर्त्तये नमः।

शिव इति दशधा जप्त्वा।

गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव त्वत्प्रसादात् महेश्वर।

इति जपं समर्प्य स्तवपाठः कर्त्तव्यः।

तुलसीचयनम् । तुलस्यमृतनामासि सदा त्वं केशवप्रिये ।
केशवार्थं चिनोमि त्वां वरदा भव शोभने ॥

नारायणस्नानम् । ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं सर्व्वतः स्पृष्ट्वा अत्यतिष्ठद्दशाङ्गुलम् ॥

नारायणध्यानम् ।

ॐ ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशंखचक्रः ॥

तुलसीदानम् । इदं सचन्दनतुलसीपत्रं ॐ नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहा ।

नारायणप्रणामः । नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।

समाप्तम् ।

বিজ্ঞাপন।

যিনি পুরাণপ্রকাশ গ্রহণাভিলাষী হইবেন, তিনি কলিকাতা, মাণিকতলা ষ্ট্রীট্, শুঁড়িপাড়া ৭৯ নং ভবনে পুরাণপ্রকাশ যন্ত্রে অথবা পটলডাঙ্গা সংস্কৃত-কালেজে শ্রীজগন্মোহন তর্কালঙ্কারের নিকট মূল্য পাঠাইলেই প্রাপ্ত হইবেন। অগ্রে মূল্য না পাইলে কাহাকেও বিষ্ণুপুরাণ দেওয়া যায় না।

যিনি শাস্ত্রপ্রকাশ গ্রহণাভিলাষী হইবেন, তিনি উক্ত পুরাণপ্রকাশ যন্ত্রে বা সংস্কৃত-কালেজে অথবা শীমলা হেদুয়ার পূর্ব্ব হরিপালের লেন ৭ নং ভবনে কাব্যপ্রকাশ যন্ত্রে উক্ত শ্রীজগন্মোহন তর্কালঙ্কারের নিকট মূল্য পাঠাইলেই প্রাপ্ত হইবেন। অগ্রে মূল্য না পাইলে কাহাকেও শাস্ত্রপ্রকাশ দেওয়া যায় না।

বিজ্ঞাপন।

যিনি যে কোন সংস্কৃত পুস্তক ক্রয় করিতে অভিলাষ করেন তিনি উক্ত তিন স্থানের মধ্যে যে কোন স্থানে আমার নিকট মূল্য পাঠাইলেই প্রাপ্ত হইবেন।

শ্রীজগন্মোহন তর্কালঙ্কার।